This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र 1M631 विषय काव्य

नाव. भर्तृहरिशृंगारशतक (MSS)

लेखक/लिपीकार माधव नीलकंठ अभ्यंकर,

पृष्ठ 14 काळ शके 1736 पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥श्रीमातापितृभ्यांनमः॥श्री
सांबसदाशिवायनमः॥अथशृंगारशतकमारभ्यते॥शंभुःस्वयंभुहरयोह
रिणेक्षणानांयेनाक्रियंतसततंगृहकर्मदासाः॥वाचामगोचरैविचित्रितायत
स्मैनमोभगवतेकुसुमायुधाय॥१॥तत्रादौस्त्रीप्रशंसा॥स्मितेनभावेनचल
ज्जयागुणैःपराङ्मुखैरेवरधैकचाक्षवीक्षणैः॥वचोभिरीर्ष्याकलहेनलीलया
समस्तभावैःखलुबंधनंस्त्रियः॥॥॥२॥॥भ्रूचातुर्याकुंचिताक्षाःकटाक्षाः
स्निग्धावाचोलज्जिताःश्चेवहासाः॥लीलामंदप्रस्खलंचस्खलंचस्त्रीणामेत
द्भूषणंचायुधंच॥३॥क्वचित्सभ्रूभंगैःक्वचिदपिचलज्जापरिणतैःक्वचिद्वि
स्रब्धैःक्वचिदपिचलीलाविलसितैः॥नवोढानामेभिर्वदनकमलैर्नेत्र

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

चलितैः स्फुरन्नीलालीनांत्रकरपरिपूर्णाइवदृशः॥४॥वक्त्रंचंद्रविकासिपंकज
परीहासक्षमेलोचनेवर्णस्वर्णमपाकरिष्णुरलिनाश्रिष्णुःकचानांचयः॥वक्षो
जाविभ्रकुंभसंभ्रमहरौगुर्वीनितंबस्थलीवाचांहारिचमार्दवंयुवतिषुस्वाभा
विकंमंडलं॥५॥स्मितंकिंचिद्वक्त्रेसरलतरलोदृष्टिविभवःपरिस्पंदोवा
चामभिनवविलासोऽस्तिसरलः॥गतीनामारंभःकिसलयितलीलापरि
करःस्पृशांयास्तास्रण्यांकिमिहनहिरंभ्यंतगदृशः॥६॥दृष्टव्येषुकि
मुत्तमंगदृशःप्रेमप्रसन्नंमुखंघ्रातव्येषपिकिंतदास्यपवनःश्रव्येषु
किंतद्वचः॥किंस्वाद्येषुतदोष्ठपल्लवसैःरस्पृश्येषुकिंतत्तनुर्ध्येयंकिंन
वयौवनंसहृदयैःसर्वत्रताद्विभ्रमः॥७॥एलास्खलद्वलयसंहति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेखलोरुस्थलशृंगारनूपुररवातूहलराजहंस्यः।। कुर्वंतिकस्यनमनोविव
शंसरूण्योविन्नस्तमुग्धहरिणीसदृशोःकराक्षेः।।८।। कुंकुमस्खपंकक
लितोदेहागोरपयोधरकंपिनहारा।।नूपुरहंसरणत्पदपद्माकंनवश्रीकु
रुतेसुविरामा।।९।।नूनंहितेकविधराविपरीतबोधायेनियमाङ्कुरव
लाइतिकामिनीनां।।याभिर्विलोलतरतारकदृष्टिपातैःपराक्रा
योपिविजितास्खबलाःकथंताः।।१०।।नूनमाज्ञाकूरस्तस्याःसुच्चु
बोमकरध्वजः।। यतस्तंनेत्रसंचारसूचितेषुप्रवर्तते।।११।।केचाःसं
यमिनःश्रुतेरपिपरंपारंगतेलोचनेत्रांतवक्रमपिस्वभावशुचिभिः
कीर्णद्विजानांगणैः।।मुक्तानांसततानिवासरुचिरंवक्षोजकुंभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वयंदृश्यंतन्निवपुःप्रच्छादंतमपिनेक्षोभंकरोसेवनः॥१२॥मुग्धेधानुष्कता
कियमपूर्वाचियिदृश्यते॥तयाविध्यसिचेतांसिगुणैरेवनसायकैः॥१३॥
सत्स्निग्धदीपस्यशिखेवसंतारविंदुषु॥विनामेमृगशावाक्ष्यासमोभू
तमिदंजगत्॥१४॥यद्वक्षःस्तनभारएषतरलेनेत्रेचलेमेखलेतेनागंधे रा
षतदोष्टपल्लवमिदंकुर्वंतुनाम्व्यथां॥सोम्याग्याधरपंक्तिरेवलि
खितापुष्पायुधेनस्वयं॥यंमध्यस्थापिकरोतिलापमधिकंरी
के मावलीकीनसा॥१५॥मुखेनचंद्रकांतेनमहानीलैःसरोरुहैः॥
पाणिभ्यांपद्मरागाभ्यांरेजेरत्नमयीवसा॥१६॥तस्याःस्तनौ
यदिघनौजघनंविहायचक्रंचचारत्वयिचित्तकिंमाकुलत्वं॥
शुकश्लोक॥ गुरुणास्तनभरेणमुखचंद्रेणमालता॥रानैश्चराभ्यांपादाभ्यांरेजेग्रहमयीवसा॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुण्यंकुरुष्वयदितेषुसवास्तिवांछा पुण्येर्विना नहिभवंतिस
माहिताथाः॥१७॥मास्यमुसार्यविचार्यकार्यमार्याः समर्पादमि
वंवदंतु॥सेव्यानितंवाःकिमुभूधराणामुत्स्मरस्मेरविलासिनीनां॥
॥१८॥संसारेस्मिन्नसारेपरिणतिसरलेद्वेगतीपंडितानांतत्वज्ञा
नामृतांभःप्रबललितधियायातुकालःकदाचित्॥नोचेन्मुग्धां
गनानांस्तनजघनघनाभोगसंभोगिनीनांस्वच्छलोपस्थस्थली
षुस्थगितकरतलस्खलिलोचतानां॥१९॥सुखेनचंद्रकांतेनम
हानीलेःशिरोरुहैः॥पाणिभ्यांपद्मरागिभ्यांरेरेरत्नमयीवसा॥
॥२०॥संमोहयंतिमदयंतिविडंबयंतिनिर्भर्त्सयंतिविरहेपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषादयंति।एताःप्रविश्यसदयंहृदयंनराणांकिंनामवामनयना
नसमाचरंति।।२१।।उभयोःस्पष्टोर्थः।इतिस्त्रीप्रशंसा।।अथ
भोगादिलक्षणं।।विश्रम्यविश्रम्यवनद्रुमाणांछायासुतन्वीविच
चारकाचित्।।स्तनोत्तरीयेणकरोत्थतेननिवारयंतीत्रिनोमयूखा
न्।।२२।।अदर्शनेदर्शनमात्रकामादृष्टापुरिघंगरसेकलोला।।
अलिंगितायांपुनरायनाक्ष्यामासाम्महाविग्रहयोरनै
द्।।२३।।मालतीशिरसिजंभणेन्मुखीचंदनंवपुषिकुंकुमावि
लं।।वक्षसित्रियतमामनोहरास्वर्गएषपरिशिष्टआगतः।।२४।।
राजामेतिमनागमानिलगुणंगातामिलाषंततः।।सव्रीडं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदनुरुथोद्यतमथत्रयस्त्रधैर्यपुनः॥ प्रेमार्द्रस्पृहणीयनिर्भरर
तःस्त्रीघग[illegible]लमंततोनिःशंकांगतिकर्षणाधिकसुखंरम्यंकु
लस्त्रीरतं॥२५॥उरसिनिपतितानांस्रस्तधम्मिल्लकानांमुकुलित
नयनानांकिंचिदुन्मीलितानां॥ उपरिसुरतखेदस्विन्नगंडस्थली
नामधरमधुवधूनांभाग्यवंतःपिबंति॥२६॥स्त्रमीलितनयना
नांयःसुरतरसोनुसंवि[illegible]टंकुरुते॥मिथुनेमिथोविचारितम
विलथमिदमेवकामनिबर्हणं॥२७॥इदमनुचितमक्रमश्च
पुंसांयदिहजरापिस्वमान्मथोविकारः॥ तदपिचनकृतंनितबि
नीनांस्खलनपतनावधिर्जीवितंरतंवा॥२८॥एतत्कामफलंलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केयद्वयोरेकचित्तता॥ अन्यचित्तकृतेकामेशयोश्चिरसंगमः॥२९॥ त्रण
यमधुरात्रमोक्षाढ्यस्वादलसास्तथा भणतिमधुरामुग्धप्रायः प्रकाशितप्रम
दाः॥ प्रकृतिसुभगाविश्रंभार्हाः स्मरोदयदायिनोरहसिकिमपिस्वैरालापा
हरंतिमृगीदृशां॥३०॥ आवासः क्रियतांगांगेपापहारिणिवारिणि॥स्त
नमध्येतरुण्यावामनोहारिणिहारिणि॥३१॥ स्त्रियपुरतोयुवतीनां
तावत्पदमातनोतुद्दृदिमानः॥ भवतिनयावच्चंदनतरुसुरभिर्मधु
रि निर्मलःपवनः॥३२॥ पर्यंमलभ्रतोवाताः शाखानवांकुरकोटयोम
धुरवीरुतोकंदावाचःस्त्रियापिकपक्षिणः॥ विरलसुरतस्वेदोद्गारा
वधुवदनेंदवः प्रसरतिमधौरात्र्यांजातोनकस्यगुणोदयः॥३३॥

२ अथऋतुवर्णनं॥ तत्रादौवसंतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधुरयंमधुरैरपिकोकिलाकलकलैर्मलियस्यचवायुभिः॥विरहिणः
प्रणिहंतिशरीरिणोविपदिहंतसुधापिविषायते॥२४॥श्वासः कि
लकिंचिदेवदयितापार्श्वेविलासालसःकर्णेकोकिलकाकलीकलर
वःस्मेरोलतापंडपः॥गोष्ठीस्वकविभिःसमंकतिपयैःसेव्याःसितांशोः
कराःकेषांचित्सुखयंतिचात्रहृदयंचैत्रोविचित्राःक्षपाः॥२५॥पंथाः
स्त्रीविरहानलाहुतिकलामाधत्तेतन्वतीमंजरीमाकंदेयुपिकांगनाभिरधु
नासोत्कंठमालोक्यते॥स्पर्धेतेनवपाटलापरिमलाप्राग्भारपाट्यचरावं
तिक्रांतिवितानतानवकृताःश्रीखंडशैलनिलाः॥२६॥सहकारकुसु
मकेसरनिकरभरामोदमूर्छितदिगंतेमधुरमधुविधुरमधुपेमधौचे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्यनोकंठा॥२७॥ अथग्रीष्मः॥ अथ छाछवंदनरसाईकरामृगाक्षी
धरागृहाणिकुसुमानिचकौमुदीच॥मंदोमनुसुमनसःशुचिहर्म्यपृष्ठंग्री
ष्मेमदंचमदनंचविवर्धयंति॥२८॥स्रजोहृद्यामोदाव्यजनपवनश्वंडकि
रणापरागःकासारोमलयजरजःसीधुविद्रादं॥शुचिःसोधोसंगःक्षतनुवस
नंपंकजद्योनिदाघातूर्णंसुखमुपलभंतेसुकृतिनः॥२९॥सुधाशुभ्रं
धामस्फुरदमलरश्मिःशशधरःप्रियावक्त्रांभोजंमलयजरजश्चालिसुरभि॥
स्रजोहृद्यामोदास्तदिमखिलंरागिणिजनेकरोत्यंतःक्षोभंनतुविषयसं
सर्गविमुखे॥३०॥अथवर्षासमयः॥तरुणीवेषोद्दीपितकामाविकसज्जा
तीपुष्पसगंधिः॥उन्नतपीनपयोधरभारात्प्रौढकुरुतेकस्यनहर्षं॥३१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वियद्युपाचितमेघंभूमयः कंदलिन्योनववकुटजकदंबामोदिनोगंधवाहाः॥
शिखिरकुलकलकेकारावरम्यावनांताःसुखिनमसुखिनंवासर्वमुत्कं
टयंति॥४३॥उपरिघनंघनपटलंतिर्यगिरंयोपिनर्तितंमयूराः॥क्षितिरपि
कंदलधवलासुस्निंपथिकःक्षत्रपातयंति॥४३॥इतोविद्युद्दीविलसि
तमितःकेतकितरोःस्फुरद्गंधःस्रोयजलदनिनदःस्फूर्जितमितः॥इ
तःकेकीक्रीडाकलकलरवःपक्ष्मलदृशांकथंयास्येतेविरहदिव
साःसंभृतरसाः॥४४॥त्रस्यच्चीतंसारेतमसिनभसिस्रोढजलदध्व
निध्वांतेतस्मिन्पतितिदृषदांनीरनिचये॥इदंसोदामन्याःकनक
कमनीयंचिलसितं॥मुदंचग्लानिंचपथयतपथिस्वैरसुदृशां॥४५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रासारेषुनहर्म्यतःप्रियतमेयातुंयदाशक्यतेशीतोत्कंपानिमित्तमाय
तदृशागाढंमालिंग्यते॥जालाःशीतलशीकराश्चमरतोरत्यंतखेदच्छि
द्रोधान्यानांवतदुर्दिनंसुदिनतांयातिप्रियासंगमे॥४६॥अथशरत्॥अर्घं
नीवानिशायाःसरभससुरतायासखीनाश्रथांगःप्रोद्भूतासह्यरुष्णामधु
मदनिरतोहर्म्यपृष्ठेविविक्तेसंभोगक्लांतंकांताशिथिलभुजलतातर्जितंग
गरीतोजोत्स्नाभिन्नाछधामंनपिबतिसलिलंशारदांमंदभाग्यः॥४७॥हेमं
तः॥ ॥हेमंतेदधिदुग्धसर्पिरशनामांजिष्ठवासोभृतःकारमीरद्रवसां
द्रदिग्धवपुषःखिनाविचित्रैरतैः॥पीनोरुस्थलकामिनीजनकृताश्लेषा
ग्रहाभ्यंतरेतांबूलीदलपूगपूरितमुखाधन्याःसुखंशेरते॥४८॥अथ

शिशिरः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चुंबंतोगंडभित्तीरलकवतिमुखेसहृतान्यादधानावक्षःसूत्कंचुकेषुस्तनभ
रपुलकोद्भेदमापादयंतः॥ऊरूनाकंपयंतःपृथुजघनतटास्त्रंसयंतोंशु
कानिव्यक्तंकांताजनानांविटचरितकृतःशौंडिरावांतिवाताः॥४९॥केशा
नाकलयन्दशोमुकुलयन्वासोबलादाक्षिपन्नातन्वन्पुलकोद्गमंप्रक
टयन्नालिंग्यकंपंत्रानेः॥वारंवारमुदारसीत्कृतकृतोदंतछदान्पीडयन्
प्रायःशौंडिरएषसंप्रतिमरुत्कांतौंसकांतायथौ॥ते॥५०॥अधुनापक्ष
द्वयनिरूपणं॥असाराःसंत्वेतेविरतिविरसायासविषयाजुगुप्संतायद्वा
ननसकलदोषास्पदमिति॥तथाप्यंतस्त्वेषांहितधियामप्यलिवलस
दीयोनाख्येयोस्फुरितहृदयैकोपिमहिमा॥५१॥भवंतोवेदांतग्रहितधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मामाक्तगुरवो विदग्धालापानांवयमपि कवीनामनुचराः।तथाप्येतद्मौन
हिपरहितमु तासुण्यमधिकंनचास्मिन्संसारेकुवलयदृशोरम्यैपरम् म
॥५२॥किमिहबहुभिरुक्तैर्युक्तिशून्यैःप्रलापैर्दयमिहपुरुषाणांसर्वदासेवनी
यं।।त्रभिनवमदलीलासुंदरंसुंदरीणांस्तनभरपरिखिन्नंयौवनंपावनंवा
॥५३॥सयंजनावञ्चिनपक्षपातालोकेषुसर्वेषुचतथ्यमेतत्॥।नान्यन्म
नोहारिनिलंबिनीभ्योदुःखैकहेतुर्नकिश्चिदन्यः॥५४॥त्रथदुरितप्र
शंसा॥तावदेवकृतिनामपिस्फुरत्येषनिर्मलविवेकदीपकः॥यावदेवन
कुरंगचक्षुषांताडवंतेचपललोचनांचलैः॥५५॥स्पष्टार्थः॥वासिचे
भवतिसंगयागमुद्रद्दिरूपवातश्रुतिमुखरमुखानांकेवलंपंडितानां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जघनमरुणरत्नग्रंथिकांचीकलापं पंकुवलयनयनानां को विहातुंसमर्थः॥
॥५६॥ स्वपरत्रतारकोसौ निंदतियोलीकंपडितायुवतीः॥ यस्मात्तपसो
पिफलंस्वर्गः स्वर्गस्यापिफलंतथाप्सरसः॥५७॥मत्तेभकुंभदलने
भुविसंतिशूराः केचित्प्रचंडमृगराजवधेपिदक्षाः॥ किंतुब्रवीमि
बलिनांपुरतःप्रसह्य कंदर्पदर्पदलनेचिरलामनुष्याः॥५८॥सर्वा
न्मार्गेतावदास्तेप्रभवतिचनरस्तावदेंद्रियाणांलज्जांतावद्विधत्तेवि
नयमपिसमालंबतेतावदेव॥ भ्रूचापाकृष्टमुक्ताः श्रवणपथिगता
नीलपक्ष्माणएतेयावल्लीलावलीनांनहृदिधृतिमुषादृष्टिबाणाःप
तंति॥५९॥उन्मत्तप्रेमसंरंभाद्रभसवशंवदंगनाः ताः॥ तत्रप्रस्

॥८८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हमाधालुब्धाःपिरवलुकातरः॥६०॥तावन्महत्वंपांडित्यंकुलीनत्वंविवे
कता॥यावज्ज्वलतिनांगेषुस्वतःपंचेषुपावकः॥६१॥स्पष्टार्थः॥ज्ञा
स्यज्ञोपिप्रथितविनयोत्रात्मबोधोपिवाढंसंसारेस्मिन्भवतिविरलो
भजनंसज्जनानां॥येनैतस्मिन्निरयनगरद्वारमुद्घाट्यंतिवामाक्षीणां
भवतिकुटिलाभ्रूलताकुंचिकेव॥६२॥क्वाःक्षीणःखंजःश्रवण का
रहितःपूयक्लिन्नःक्रिमिकुलशतैराचिततनुः॥
क्षुधाक्षामोजीर्णःपिठरकपालार्पितगलःशुचीमन्येश्वानंतम
पिचहंतेवमदनः॥६३॥स्त्रीमुद्रांन्यषेधत्तस्यजननीसर्वार्थसंप
करीयेमूढाःप्रविहाययांतिकुत्सितियोमिथ्याफलान्वेषिणः॥

धि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तैलेनैवनिहत्यनिर्दयतरंनग्नीकृतामुंडिताः केचित्पंचशिखीकृताश्चजटिलाः कापालिकाश्चापरे॥ द्ध४॥ विश्वामित्रपराशरप्रभृतयोवातांबुपर्णाशनास्तेपिस्त्रीमुखपंकजंसुललितंदृष्ट्वैवमोहंगताः॥ शाल्यन्नंसघृतंपयोदधियुतंभुंजंतियेमानवास्तेषामिंद्रियनिग्रहोयदिभवेद्विंध्यस्तरेत्सागरः॥ द्ध५॥ संसारेस्मिन्नसारेकुनृपतिभवनद्वारसेवांबलंब्यासंगव्यस्तधैर्यकथमनलधियोमान्यसंसंविदध्युः॥ यद्योताःस्त्रोयबिंदुद्युतिनिचयहृतोनस्युरंभोजनेत्राःश्रेयस्कांचीकलापाःस्तनभरविनमन्मध्यभागास्तरुण्यः॥ द्ध६॥ सिंहाध्यासितकंदरेहरदृषत्कंघावगाढद्रुमंगांगाधौतशिलातलेहिमवतःस्थानेस्थितेश्रेयसि॥ कःकुर्यात्तृणबिंदु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रः प्रणाममलिनंमानंमनस्वीजनोयद्यत्रस्थकुरंगशावनयनानस्मु
स्मरास्त्रंस्त्रियः॥ ६७॥संसारतरनिस्तारपदवीनदवीयसी॥ अंतरा
दुस्तरानस्युपदिरेमदिरेक्षणाः॥ ६८॥ अथयोनयरांसा॥राजन्रूपैश्वर्यां
बुराज्ञोनहिजगतिगतः स्थिरंकेदवोंकस्यानंकोवार्थैर्थैःप्रभूतैःसवपुषि
गलितेयौवनेसानुरागो॥गछामःसद्मयावद्धकसितकुमुदंदीवरालो स्वप्न
किनीनामाक्रम्याक्रम्यरूपंझटितिनजरयालुप्यतेप्रेयसीनां॥ ६९॥
रागस्यागारमेकंनरकगतमहादुखसंत्रासिहेतुमोहिस्योत्पत्तिबीजंज
लधरपटलंज्ञानताराधिपस्य॥कंदर्पस्यैकमित्रंप्रकटितविविधस्मर
दोषप्रबंधंलोकेस्मिन्नह्यनर्थंनिजकुलदहनंयौवनारन्यदस्ति॥७०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृंगारद्रुमनीरदेऽचुकिऽक्रीडारससेतासिप्रद्युम्नप्रियबांधवेचतुरतामक्का
फलोदन्वतिऽतन्वीनेत्रचकोरपारणविधौसौभाग्यलक्ष्मीनिधौधन्यःको
विनपिक्रियांकलयतिश्लाघ्येनवेयौवने॥ ७१॥इतियौवनप्रशंसा॥अथ
कामिनीगर्हणं॥कांयेयुत्पललोचनेतिविपुलश्रोणीभरेयुक्तःपीनोत्तुं
गपयोधरेतिसुमुखांभोजेतिसुन्नरिति॥दृष्ट्वामाद्यतिमोदतेतिरमतेत्रस्यं
तिजानन्नपिप्रत्यक्षाशुचिपुत्रिकांस्त्रियमहोमोदस्यदुग्धेस्थितं॥ ७२॥
श्रुताभवतितापायदृष्टाचोन्मादवह्निनी॥स्पृष्टाभवतिमोहायसानामदृषि
ताकथं॥ ७३॥तावदेवामृतमयीयावल्लोचनगोचरा॥चक्षुःपथादपग
ताविषादयतिरिच्यते॥ ७४॥नामृतंनविषंकिंचिदेकामुक्तांगनांविनां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सैवामृतलतारक्ताविरक्ताविषवल्लरी॥७५॥नोसत्येनराजांकएषवद
नामृतेनचेंदीवरद्वंद्वेलोचनतांगतेनकनकैरपांगयष्टिःकृता॥किंचे
वंकविभ्रमोत्तारितमनास्तत्संविज्ञानैर्नपिलज्जासास्थिमयंवपुर्म
गदृशांमंदोजनःसेवने॥७६॥लीलावलीनांसलज्जाविलासास्तएव
मुग्धस्पृहंस्फुरंति॥रागोनलिप्सांहिनिसर्गसिद्धस्तत्रंभ
मैवमुदाधत्तेंघ्रिः॥७७॥स्पष्टः॥यदेतेतेर्णेदियुतिहरमुदाराक्ष
तिवरमुखान्जंतन्वंग्याःकिलवसतिनत्राधरमधु॥इदंतावत्साक
डुमफलमिवातीववि[illegible]रसं॥व्यतीतेस्मिन्काले विषमिवभविष्यत्य
सुखदं॥७८॥कांतानामनदीकृत्याउभयोःसारत्वंवर्ण्यते॥

उन्मीलत्त्रिवलीतरंगनिलया प्रोत्तुंगपीनस्तनद्वंद्वोद्यत्तचक्रवाकमिथुना
वक्त्रांबुजोद्भासिनी॥ कांताकारधरानदीयमभितः क्रूरायाने द्यतेसंसार
र्णवमज्जनंयतितोदूरेणसंत्यज्यतां॥ ७९॥ जल्पंतिसार्धमन्येन पश्यंसन्यं
सविभ्रमाः॥ हृदयेचिंतयंत्यन्यंस्त्रियः कोनामयोषितां॥ ८०॥ स्पष्टः॥ किंचि
दंनहितेभानौपद्मनीवीतरागिणी॥ आलिंग्यमधुपंरोतेस्त्रियः कोनाम
योषितां॥ ८१॥ मधुतिष्ठतिवाचियोषितां हृदिहालाहलमेवकेवलं॥ आ
नम्रवनिपीयतेधरोहृदयंमुष्टिभिरेवताड्यते॥ ८२॥ अपसरसखे
दूरादस्मात्कटाक्षविशिखानलास्त्रकृतिविषमाद्योषित्सर्पाद्विलास
फणाभृतः॥ इतरफणिणादष्टः राम श्रियं सितुमोक्षवांछसि

॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुरक्तमिताभोगग्रस्तंसृजंतिहिमंत्रिणः॥८३॥विस्तारितंमकरकेतन
धीवरेण॥स्त्रीसंज्ञितंवडिशमंत्रभवांबुराशौ॥येनाचिरात्तदधरामिष
लोकमर्यमस्यान्विकृष्यपचसीयनुरागवन्हे॥४॥कामिनीकाय
कांतामेकुचपर्वतदुर्गमे॥मासंचरमनःपांथतत्रास्तेस्मरतस्करः॥
॥८५॥स्पष्टः॥व्यादीर्घणचेतनवक्रगतिनातेजस्विनाभोगिनानी
लांबुजद्युतिनाहिनावरमहोदष्टोतत्चक्षुषा॥दष्टाःसंतिचिकिस
कादिशिदिशीत्राणेणधर्मार्थिनामुग्धाक्षीक्षणवीक्षितस्यनहिमे
वैद्योनचायौषधं॥८६॥इहहिमधुरगीतंनृत्यमेतद्रसोयंस्फरति
परिमलोसौस्पर्शएषस्तनानां॥इतिहतपरमार्थैरिंद्रियैर्न्याम्यमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णोत्यहितकरणदक्षैःपंचभिर्वंचितोसि॥८७॥नगम्योमंत्राणांनच
भवतिभेषज्यविषयोनचापित्रध्वंसेव्रजतिविविधैःशांतिकशतैः॥भ्र
मावेशादंगेकिमपिविदधद्व्यमसमंस्मरोपस्मारोयंभ्रमयतिद
शंघूर्णयतिच॥८८॥जायंधायचदुर्मुखायचजराजीर्णायविलंगायच
ग्रामीणायचदुःकुलायचबलग्लकुष्ठाभिभूतायच॥यच्छंतीषुम
नोहरंनिजवपुर्लक्षीलवश्रद्धयापण्यस्त्रीषुविवेककल्पलतिका
शास्त्रीषुरज्येतकः॥८९॥वेश्यासोमदनज्वालारूपेंधनसमेधिता॥
कामिभिर्यत्रहूयंतेयौवनानिधनानिच॥९०॥कश्चुंबतिकुरुल
पुरुषोवेश्याधरपल्लवंमनोज्ञमपि॥चारभाटसौचोरचेटकनटवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुभूयतेस्थिरमिवस्फीतेभ्रुमेकमणि॥विछि॥न्नेनितरामनंगकलहक्री
डारटत्तंनुकिंमुक्ताजालमिवप्रयातिशशिति॥च्चत्र्यद्वि॥शोदृश्यतां॥
॥९५॥सदायोगाभ्यासव्यसनवशायोगिरामनसोरविछि॥न्नोमैत्री
स्फुरतियमिनस्तस्यकिमुतैः॥॥प्रियाणामालोपेरधरमधुभिर्यत्रिवि
धुभिःसनिश्वासामोदैःसकुचकलशाश्लेषसुरतैः॥९६॥किंकंदर्प
करंकदर्थयसिकिंकोदंडझंकारितैःरेरेकोकिलकोमलंकलरवंकिं
स्तंदृथाजल्पसि॥मुग्धेस्निग्धविदग्धमुग्धमधुरैर्लोलैःकटाक्षैरलं
चेतश्चुंबितचंद्रचूडचरणध्यानामृतेवर्तते॥९७॥इतिस्यक्षः॥॥यदा
सीदज्ञानंस्मरतिमिरसंचारजनितंतदासर्वंनारीमयमिदमशेषंजग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टनिष्ठीवनशरावं॥ ९१॥इतिकामिनीनिगर्हणं॥अथसुविरक्तप्रशंसा॥
धन्यास्तवेऽतरलायतलोचनानांलावण्यपूर्णघनपीनपयोधराणां॥
क्षामोदरोपरिलसत्रिवलीलतानांदृष्टाकृतिंविरतिमेतिमनोनयेषां
॥९२॥बालेलीलामुकुलितमसीसुंदरादृष्टिपाताःकिंक्षिप्यंतेविरमवि
रमव्यर्थएषःश्रमस्ते॥सप्रत्यूहेवयमुपरतंबाल्यमास्थावनांतेक्षोणोमो
हस्तूणमिवजगज्जालमालोकयामः॥९३॥स्यंबालामांप्रसभनकरतमिंदी
वरदलत्रभाचोरंचक्षुःक्षिपतिकिमभिप्रेतमनया॥गतोमोहस्मांकरै
स्मेशबरबाणव्यतिकरज्वरज्वालाःशांतास्तदपिनवराकीविरमति॥
॥९४॥शुभ्रंसद्मसविभ्रमायुवतयःश्वेतातपत्रोज्वलालक्ष्मीरिस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दमूत्र॥इदानीमस्माकंपटुतरविवेकांजनदत्तांसमीभूतादृष्टिस्त्रि भु
वनमपिब्रह्ममनुते॥८॥इतिसुतरांविरक्तसुविरक्तब्रह्मांसा॥वैराग्ये
संचरयेकोनौभ्यमतिचापरः॥शृंगारेरमतेकश्चित्॥श्रितभुविभेदाः
परस्परा॥स्पष्टः॥९९॥यचस्यनास्तिरुचिरंतत्रास्यास्पृहामनोज्ञेपि॥
रमणीयेपिसुधांशोनमनःकामःसरोजिन्याः॥१००॥ छ छ छ
शतिभर्तृहरिणाविरचितंशृंगारशातकंसंपूर्णं॥श्रीसांबसदा
सिवार्पणमस्तु॥इदंपुस्तकंअश्वग्रामकरनीलकंठात्मजस्यसू
नोर्माधवस्यास्तिसयं॥१ तेनैवस्वार्थंपरोपकारार्थंलिखितंसयं॥
शके१७७६ भावानामसंवत्सरेअधीकशुद्धद्वितीयासोम्यवासरस्तदिने
स्वपुस्तकंतियप्रहरेसमर्पितं॥श्रीसांब॥छ॥ ॥१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति भर्तृहरिणाकृतश्रृंगारशतकम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=26.11.19 14:59
,TRANSFERRED=2019/11/26 at 15:04:39
,PAGES=30
,TYPE=STD
,NAME=S0002169
,Book Name=M-631-BHANU HARI SHRINGAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE30=00000030.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection